# Maudgalyamuniproktam Shivalingasvarupopadesham

# મૌદ્ગલ્યમુનિપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશમ્

## Document Information

Text title : Maudgalyamuniproktam Shivalingasvarupopadesham

File name : maudgalyamuniproktaMshivalingasvarUpopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 487-544.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# મૌદ્ગલ્યમુનિપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
મૌદ્ગલ્ય ઉવાચ
લિઙ્ગરૂપી મહાદેવઃ શિવલિઙ્ગે સમર્ચિતઃ ।
દદાતિ મહદૈશ્વર્યં મોક્ષં ચાન્તે દ્વિજોત્તમાઃ ॥ ૪૮૭॥

નાનાવિધાનિ લિઙ્ગાનિ તાન્યુચ્યન્તે મયાધુના ।
ગોમેદકાખ્યમસ્ત્યેકં લિઙ્ગં શઙ્કરસમ્મતમ્ ॥ ૪૮૮॥

વૈદ્રુમં લિઙ્ગમસ્ત્યેકં પદ્મરાગમયં તથા ।
વજ્રવૈડૂર્યલિઙ્ગાનિ તથા ધાતુમયાનિ ચ ॥ ૪૮૯॥

કાશ્મીરલિઙ્ગમસ્ત્યેકં સ્ફાટિકં લિઙ્ગમસ્તિ ચ ।
અન્નલિઙ્ગં ધાન્યલિઙ્ગં લિઙ્ગં ગોમયનિર્મિતમ્ ॥ ૪૯૦॥

લાવણં લિઙ્ગમસ્ત્યેકં ફલદારુમયં તથા ।
ભસ્મના રચિતં લિઙ્ગં મૃન્મયં લિઙ્ગમસ્તિ ચ ॥ ૪૯૧॥

નર્મદાજલસમ્ભૂતં લિઙ્ગમેકં મુનીશ્વરાઃ ।
શિલાજન્યં રસોત્પન્નં લિઙ્ગં જાબાલચોદિતમ્ ॥ ૪૯૨॥

લિઙ્ગેષ્વેતેષુ સર્વેષુ લિઙ્ગત્રયમનુત્તમમ્ ।
તત્ર સમ્પૂજિતઃ શમ્ભુઃ પ્રસીદતિ ન સંશયઃ ॥ ૪૯૩॥

મૃદ્બાણરસલિઙ્ગાનિ શ્રેષ્ઠાન્યેતેષુ વસ્તુતઃ ।
ત્રિષ્વાદ્યાદ્બાણમુત્કૃષ્ટં રસલિઙ્ગં તતોઽધિકમ્ ॥ ૪૯૪॥

વિદ્યુદ્ગોમુખવલ્કાર્યં મૃન્મયં લિઙ્ગમુત્તમમ્ ।
એવમન્યાનિ લિઙ્ગાનિ કર્તવ્યાનિ મનીષિભિઃ ॥ ૪૯૫॥

વક્ષ્યેઽહં બાણલિઙ્ગસ્ય લક્ષણં શ્રુતિચોદિતમ્ ।
બાણલિઙ્ગ શ્રુતિપ્રોક્તં તલ્લક્ષણમપિ દ્વિજાઃ ॥ ૪૯૬॥

ત્રિપઞ્ચસપ્તધા યત્તુ તુલાતુલિતમાસ્તિકાઃ ।
ન યાતિ સમતાં તત્તુ બાણલિઙ્ગમિતિ શ્રુતમ્ ॥ ૪૯૭॥

સપીઠમસ્ત્વપીઠં વા બાણલિઙ્ગં શિવાત્મકમ્ ।
પૂજનીયં પ્રયત્નેન ભુક્તિમુક્તિફલેપ્સુભિઃ ॥ ૪૯૮॥

ન પ્રતિષ્ઠાદ્યપેક્ષાપિ બાણલિઙ્ગસ્ય વસ્તુતઃ ।
યતઃ કુતશ્ચિદાનીય બાણલિઙ્ગં પ્રપૂજયેત્ ॥ ૪૯૯॥

નર્મદે નર્મદાલિઙ્ગે નિવસામ્યહમન્વહમ્ ।
સન્દેહં મા કુરુષ્વેતિ પ્રાહ શમ્ભુર્યતઃ પુરા ॥ ૫૦૦॥

શિવલિઙ્ગ સહસ્રાણાં પૂજયા યત્ફલં લભેત્ (ભવેત્) ।
તતઃ શતગુણં પુણ્યં રત્નલિઙ્ગસ્ય પૂજનં(નાત્) ॥ ૫૦૧॥

ગોમેદકાનિ લિઙ્ગાનિ રત્નલિઙ્ગાનિ સુવ્રતાઃ ।
રત્નલિઙ્ગસહસ્રાણાં પૂજયા યત્ફલં લભેત્ (ભવેત્) ॥ ૫૦૨॥

તતઃ શતગુણં પુણ્યં ધાતુલિઙ્ગસ્ય પુજને ।
ધાતુલિઙ્ગેષ્વપિ શ્રેષ્ઠં હેમલિઙ્ગં શ્રુતિશ્રુતમ્ ॥ ૫૦૩॥

તત્ર સમ્પૂજિતઃ શમ્ભુઃ પ્રસીદતિ ન સંશયઃ ।
ધાતુલિઙ્ગ સહસ્રાણાં પૂજયા યત્ફલં ભવેત્ ॥ ૫૦૪॥

તતઃ શતગુણં પુણ્યં મૃત્તિકાલિઙ્ગ પૂજને ।
મૃલ્લિઙ્ગાનાં સહસ્રસ્ય પૂજયા યત્ફલં લભેત્ (ભવેત્) ॥ ૫૦૫॥

તતઃ શતગુણં પુણ્યં બાણલિઙ્ગસ્ય પૂજને ।
અનન્તબાણલિઙ્ગાનાં પૂજયા યત્ફલં ભવેત્ (લભેત્) ॥ ૫૦૬॥

તતોઽનન્તગુણં પુણ્યં રસલિઙ્ગસ્ય પૂજણે ।
રસલિઙ્ગસમંલિઙ્ગં નાસ્તિ ન શ્રૂયતેઽપિ ચ ॥ ૫૦૭॥

રસલિઙ્ગે શિવઃ સાક્ષાત્સચ્ચિદાનન્દલક્ષણઃ ।
રસલિઙ્ગસ્ય માહાત્મ્યં જાનાતિ ભગવાઞ્છિવઃ ॥ ૫૦૮॥

તદન્યે ન વિજાનન્તિ સત્યં સત્યં ન સંશયઃ ।
ન બહવો મુનયઃ પૂર્વં રસલિઙ્ગાર્ચનાદ્દ્વિજાઃ ॥ ૫૦૯॥

મોક્ષં પ્રાપુરનાયાસાદ્વિના યાગાદિકર્મભિઃ ।
શિવાસ્વયમુમાકાન્તં રસલિઙ્ગસ્વરૂપિણમ્ ॥ ૫૧૦॥

પૂજયામાસ તેનૈવ પ્રસન્નોઽભૂન્મહેશ્વરઃ ।
રસઃ સાક્ષાન્મહાદેવો "રસો વૈ સઃ" ઇતિ શ્રુતઃ ॥ ૫૧૧॥

અતોરસાત્મકં લિઙ્ગં જાબાલે બહુધા શ્રુતમ્ ।
રસઃ સૃષ્ટોમહેશેન ભક્તાનુગ્રહકાઙ્ક્ષયા ॥ ૫૧૨॥

તત્કૃતં લિઙ્ગમુત્કૃષ્ટં સર્વાભીષ્ટફલપ્રદમ્ ।
યં યં કામયતે કામં રસલિઙ્ગસ્ય પૂજયા ॥ ૫૧૩॥

તં તમાપ્નોતિ વિપ્રેન્દ્રાઃ સત્યં સત્યં ન સંશયઃ ।
સર્વલિઙ્ગોત્તમં પુણ્યં રસલિઙ્ગમનુત્તમમ્ ॥ ૫૧૪॥

તતસ્તત્પૂજયા શમ્ભુઃ સાક્ષાત્સમ્પૂજિતો ભવેત્ ।
રસલિઙ્ગાર્ચનં શ્રેષ્ઠં સર્વલિઙ્ગાર્ચનાદપિ ॥ ૫૧૫॥

તતસ્તદેવ યત્નેન પૂજનીયં મનીષિભિઃ ।
રસલિઙ્ગં યદિ ભવેત્પૂજનીયં તદન્વહમ્ ॥ ૫૧૬॥

તદભાવે પૂજનીયં બાણલિઙ્ગં પ્રયત્નતઃ ।
બાણલિઙ્ગં યદિ ગૃહે ન ભવિષ્યતિ સર્વથા ॥ ૫૧૭॥

પૂજનીયં પ્રયત્નેન મૃત્તિકાલિઙ્ગમાસ્તિકૈઃ ।
તદભાવે પૂજનીયં ધાતુલિઙ્ગં પ્રયત્નતઃ ॥ ૫૧૮॥

કાશ્મીરલિઙ્ગમભ્યર્ચ્યં તદભાવે પ્રયત્નતઃ ।
તદભાવે પૂજનીયં શિલાલિઙ્ગં પ્રયત્નતઃ ॥ ૫૧૯॥

તદભાવે પૂજનીયં દારુલિઙ્ગં પ્રયત્નતઃ ।
તદભાવે પૂજનીયમન્નલિઙ્ગં પ્રયત્નતઃ ॥ ૫૨૦॥

તદભાવે તુ ભૂત્યાદિલિઙ્ગાન્યર્ચ્યાનિ યત્નતઃ ।
યાદૃશં તાદૃશં વાઽસ્તુ શિવલિઙ્ગં શિવાત્મકમ્ ॥ ૫૨૧॥

પૂજનીયં પ્રયત્નેન દ્વિશૈર્વેદોક્તમાર્ગતઃ ।
શૈવઃ પઞ્ચાક્ષરો મન્ત્રો યઃ સર્વશ્રુતિ શ્રુતઃ ॥ ૫૨૨॥

તેનૈવ મન્ત્રરાજેન પૂજનીયો મહેશ્વરઃ ।
શ્રીમત્પઞ્ચાક્ષરેણૈવ પૂજિતઃ શ્રામહેશ્વરઃ ॥ ૫૨૩॥

દદાતિ પરમામૃદ્ધિં મોક્ષં ચાન્તે ન સંશયઃ ।

શ્રીમહાદેવમારાધ્ય લિઙ્ગરૂપિણમવ્યયમ્ ॥ ૫૨૪॥

પઞ્ચાક્ષરેણ સમ્પૂજ્ય મુક્તાઃ પૂર્વમનન્તશઃ ।
શ્રૌતેત મનુનાકાર્યં શ્રૌત લિઙ્ગાર્ચન દ્વિજાઃ ॥ ૫૨૫॥

શ્રૌતોમનુર્મન્ત્રરાજઃ શૈવઃ પઞ્ચાક્ષરઃ સ્મૃતઃ ।
વૈદિકૈર્યત્નતઃ કાર્યં વૈદિકં લિઙ્ગપૂજનમ્ ॥ ૫૨૬॥

અન્યથા રૌરવં યાતિ યાવદાચન્દ્રતારકમ્ ।
લિઙ્ગપૂજૈવ કર્તવ્યા વૈદિકૈર્વેદવાદિભિઃ ॥ ૫૨૭॥

શિવલિઙ્ગાન્યપૂજાયાં વૈદિકા નાધિકારિણઃ ।
દ્વિજાઃ કલૌકરિષ્યન્તિ શિવલિઙ્ગાન્યપૂજનમ્ ॥ ૫૨૮॥

તે રૌરવં પ્રયાસ્યન્તિ સત્યં સત્યં ન સંશયઃ ।
યાવન્ન કલિરાયાતિ તાવદ્યૂયં પ્રયત્નતઃ ॥ ૫૨૯॥

શિવલિઙ્ગાર્ચનં કૃત્વા લભધ્વં મુક્તિમાસ્તિકાઃ ।
શ્રૌતં શિવાર્ચનં યસ્માત્કર્તવ્યં મુક્તિકાઙ્ક્ષિભિઃ ॥ ૫૩૦॥

શ્રૌતલિઙ્ગાર્ચનત્યાગે પતન્તિ નરકે ધ્રુવમ ।
ચરલિઙ્ગાનિ પૂજ્યાનિ સ્થાવરાન્યપિ યત્નતઃ ॥ ૫૩૧॥

ત્રિકાલં સ્થાવરં લિઙ્ગં પૂજનીયં પ્રયત્નતઃ ।
કૃત્વા સ્થાવરલિઙ્ગાર્ચાં ચરલિઙ્ગાર્ચનં વિના ॥ ૫૩૨॥

ભોક્તવ્યં સ્થાવરાર્ચાં તુ વિના ભુઞ્જીત ન દ્વિજાઃ ।
સ્થાવરં લિઙ્ગમભ્યર્ચ્ય સ્પૃષ્ટ્વા ચ પ્રત્યહં દ્વિજૈઃ ॥ ૫૩૩॥

ભોક્તવ્યમન્યથા યાતિ નરકં સૂતકં વિના ।
ન યત્ર સ્થાવરંલિઙ્ગં યત્ર સ્થાતવ્યમેવ ચ ॥ ૫૩૪॥

યતઃ સ્થાવરલિઙ્ગસ્ય પૂજા નિત્યં દ્વિજન્મનામ્ ।
સર્વથા સ્થાવરં લિઙ્ગં યદિ ન સ્યાત્તદા દ્વિજૈઃ ॥ ૫૩૫॥

ચરલિઙ્ગમુપસ્પૃશ્ય જપ્યો રુદ્રોઽષ્ટધા દ્વિજૈઃ ।
અથવા નાર્મદં લિઙ્ગમનુલિપ્તેઽવનીતલે ॥ ૫૩૬॥

સ્થાપયિત્વા પૂજનીયં શૈવેન મનુના દ્વિજૈઃ ।
પૂજાન્તે તત્પુનર્ગ્રાહ્ય નાર્મદં લિઙ્ગમાસ્તિકૈઃ ॥ ૫૩૭॥

નીત્વાન્યત્રાપિ સંસ્થાપ્ય પૂજનીયં પુનઃ પુનઃ ।
યદિ નાર્મદલિઙ્ગસ્યાપ્યભાવઃ સ્યાત્તદા દ્વિજૈઃ ॥ ૫૩૮॥

સમ્પૂજ્યં પાર્થિવ લિઙ્ગં સ્થાપયિત્વાઽવનીતલે ।
મૃલ્લિઙ્ગાર્ચનમાત્રેણ સ્થાવરં લિઙ્ગમર્ચિતમ્ ॥ ૫૩૯॥

સ્થાવરત્વં ચ મૃલ્લિઙ્ગે સ્થાવરત્વસ્ય કલ્પનાત્ ।
સદ્યોજાતાદિભિર્મન્ત્રૈઃ સ્થાપયિત્વા સ્થિરોભવ ॥ ૫૪૦॥

ગૃહાણ પૂજામિતિ ચ સ્થાવરત્વં ચ કલ્પયેત્ ।
નિત્યં બિલ્વદલૈઃ કાર્યં ભસ્મના ચ શિવાર્ચનમ્ ॥ ૫૪૧॥

ધૂપદીપાદિક સર્વં કલ્પનીયં સ્વશક્તિતઃ ।
શિવલિઙ્ગાર્ચનં પુણ્યં ભુક્તિદં મુક્તિદં સદા ॥ ૫૪૨॥

કાશીપ્રાપ્તિકરં ચૈતત્કિં નિર્વાણં ન યચ્છતિ ।
શિવલિઙ્ગાર્ચનાદ્વિપ્રાઃ કાશીતત્વં ચ બુધ્યતે ॥ ૫૪૩॥

તાદૃશં તદ્ભક્તિદં ચ મુક્તિદં ચ ભવિષ્યતિ । ૫૪૪.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મૌદ્ગલ્યમુનિપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૪૮૭-૫૪૪.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNanam
. 487-544.1..

Notes:

Maudgalya Muni મૌદ્ગલ્ય મુનિ delivers Upadeśa ઉપદેશ about worshiping Śivaliṅga-s શિવલિઙ્ગાનિ made of various materials including Gomedakaliṅga ગોમેદકલિઙ્ગ, Vaidrumaliṅga વૈદ્રુમલિઙ્ગ, Kāśmīraliṅga કાશ્મીરલિઙ્ગ, Sphaṭikaliṅga સ્ફટિકલિઙ્ગ, Annaliṅga અન્નલિઙ્ગ, Dhānyaliṅga ધાન્યલિઙ્ગ, Gomayaliṅga ગોમયલિઙ્ગ, Lāvaṇaliṅga લાવણલિઙ્ગ, Phaladārumayaliṅga ફલદારુમયલિઙ્ગ, Bhasmanāracitaliṅga ભસ્મનારચિતલિઙ્ગ, Mṛnmayaliṅga/Mṛlliṅga મૃલ્લિઙ્ગ/મૃન્મયલિઙ્ગ, Rasaliṅga રસલિઙ્ગ, Nārmadaliṅga/Bāṇaliṅga નાર્મદલિઙ્ગ/બાણલિઙ્ગ. He also specifies regarding worship of Sthāvaraliṅga/Sthiraliṅga સ્થાવરલિઙ્ગ/સ્થિરલિઙ્ગ and Caraliṅga ચરલિઙ્ગ.

Proofread by Ruma Dewan

*Maudgalyamuniproktam Shivalingasvarupopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*